## अकेनोर्भविष्यदाधमर्ण्ययोः। (७०/६२८)

[1]अकस्य भविष्यति काले [2]विहितस्य, इनस्तु भविष्यति [3]चाधमर्ण्ये च [4]विहितस्य प्रयोगे षष्ठी विभक्तिर्न[5] भवति। कटं कारको (३.३.१०/३१७५) व्रजति। ओदनं भोजको व्रजति (म.भा.१.४७०)। इनः खल्वपि[6]-ग्रामं गमी (३.३.३/३१७१) (म. भा. १. ४७०)। ग्रामं गामी। शतं दायी (३.३.१७०/३३११)। सहस्रं दायी (म. भा. १. ४७०)। भविष्यदाधमर्ण्ययोः इति किम्? यवानां [7]लावकः (३.१.१३३/२८९५)। सक्तूनां पायकः। अवश्यंकारी (३.३.१७०/३१७१)कटस्य। इह कस्मान् न भवति, वर्षशतस्य पूरकः, पुत्रपौत्राणां दर्शकः इति? भविष्यद[8]धिकारे विहितस्याकस्येदं ग्रहणम्॥

## कृत्यानां कर्तरि वा। (७१/६२९)

'कर्तृकर्मणोः कृति' (२. ३. ६५/६२३) इति [9]नित्यं षष्ठी प्राप्ता [10]कर्तरि विकल्प्यते। कृत्यानां प्रयोगे कर्तरि वा षष्ठी विभक्तिर्भवति, [11]न कर्मणि। भवता कटः कर्तव्यः, भवतः कटः कर्तव्यः। कर्तरि इति किम्? गेयो माणवकः साम्नाम् (म. भा. १. ४७०)।

[१५०] [12]उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधो वक्तव्यः। (म. भा. १. ४७०)

[13]क्रष्टव्या ग्रामं शाखा देवदत्तेन। नेतव्या ग्राममजा [14]देवदत्तेन॥

## तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्। (७२/६३०)

तुल्यार्थैः शब्दैर्योगे तृतीया [15]विभक्तिर्भवत्यन्यतरस्याम्, [16]पक्षे षष्ठी च, तुलोपमाशब्दौ वर्जयित्वा। [17]शेषे विषये तृतीयाविधानात् तया मुक्ते [18]षष्ठ्येव भवति। तुल्यो देवदत्तेन, तुल्यो देवदत्तस्य। सदृशो देवदत्तेन, सदृशो देवदत्तस्य। अतुलोपमाभ्याम् इति किम्? तुला देवदत्तस्य नास्ति। उपमा कृष्णस्य न विद्यते। वा इति[19] वर्तमाने[20]ऽन्यतरस्यांग्रहणमुत्तरसूत्रे तस्य चकारेणानुकर्षणार्थम्। इतरथा हि तृतीयाऽनुकृष्येत॥

## चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः। (७३/६३१)

आशिषि गम्यमानायाम् आयुष्य मद्र भद्र कुशल सुख अर्थ हित इत्येतैर्योगे चतुर्थी विभक्तिर्भवति। चकारो विकल्पानुकर्षणार्थः। शेषे चतुर्थीविधानात् तया मुक्ते षष्ठी[21] विभक्तिर्भवति।

[१५१] [22]अत्रायुष्यादीनां पर्यायग्रहणं कर्तव्यम्।

आयुष्यं देवदत्ताय भूयात्, [23]आयुष्यं देवदत्तस्य भूयात्। चिरं जीवितं देवदत्ताय देवदत्तस्य वा भूयात्।

---

1. अकस्तु ह. 2. विहितस्य नास्ति ह. 3. च नास्ति ब. 4. विहितस्य नास्ति क. 5. न नास्ति फ.इ. 6. अपि नास्ति ह, भविष्यति इत्यधिकम् इ. क. 7. पालकः ह, लोचकः इ. 8. °अधिकारविहितस्य इ. 9. नित्या क. ह, नास्ति ग. 10. कर्तरि नास्ति ग. 11. न कर्मणि नास्ति क. ड. इ. ग. 12. उभयप्राप्ते क. 13. आक्रष्टव्या ड. इ. ह. 14. यज्ञदत्तेन क. ड. 15. विभक्तिः नास्ति क. ड. 16. पक्षे नास्ति क. ड. ह. फ. 17. शेषविषये विधानात् क. ड. ह. 18. एव नास्ति ग. 19. च इत्यधिकम् ब. 20. पुनर् इत्यधिकम् ह. 21. एव इत्यधिकम् ह. 22. वाक्यमिदं नास्ति क. ड. इ. ह. फ. 23. उदाहरणमिदं नास्ति ह.